# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा एप्रिल – २०१६

| | | |
|---|---|---|
| कक्षा – शास्त्री-२ (SEM-4) | **प्रश्नपत्रम् – ६** | गुणाः - ७० |
| विषयः – साहित्यम् | **CC-248** | समयः - ३ तः ६ |
| दिनाङ्कः – २३/४/२०१६ | सन्दर्भग्रन्थः – वेणीसंहारम् ४ तः ६ अङ्काः | |

| | | |
|---|---|---|
| | **प्रथमान्वितिः -१** | |
| **प्रश्नः -१** | **द्वयोः ससन्दर्भं व्याख्या कार्या** | ०८ |
| | (१) तस्यैव पाण्डवपशोरनुजद्विषो मे, क्षोदैर्गदाऽशनिकृतैनं विबोधितोऽस्मि ।<br>तामेव नाधिशयितोरुधिरार्द्रशय्यां दौशासनीं यदहमाशु वृकोदरो वा ॥<br>(२) पर्याप्तनेत्रमचिरोदितकान्त, मुद्भिद्यमाननवयौवनरम्यशोभम् ।<br>प्राणापहारपरिवर्तितदृष्टिदृष्टं, कर्णेन तत्कथमिवाऽऽननपङ्कज ते ॥<br>(३) अद्यैवाऽऽवां रणमुपगतौ तातमम्बां च दृष्ट्वा,<br>घ्रातस्ताभ्यां शिरसि विनतोऽहं च दुःशासनश्च ।<br>तस्मिन्बाले प्रसभमरिणा प्रापिते तामवस्थां,<br>पार्श्वे पित्रोरपगतघृणः किन्नु वक्ष्यामि गत्वा ॥ | |
| **प्रश्नः -२** | चतुर्थाङ्कस्य कथासारः ग्रन्थोक्तदिशा लिख्यताम् ।<br>अथवा<br>दुर्योधनचरितं संवादोपूर्वकं लेख्यम् । | ०८ |
| **प्रश्नः -३** | **एका टिप्पणी लेख्या ।** | ०२ |
| | (१) सुन्दरकः (२) सूतः | |
| **प्रश्नः - ४** | **द्वौ प्रश्नौ एकेन वाक्येन समाधेयौ ।** | ०२ |
| | (१) वृषसेनः कस्य पुत्रः ?<br>(२) न सारथिः, न तुरङ्गमा, न दिशो, न वीरलोकश्च लक्ष्यते ।<br>इति कस्य मुखात् निःसृतम् ।<br>(३) “अपि नाम भवेन्मृत्युर्न च हन्ता वृकोदरः” इति कस्योक्तिः । | |
| | **द्वितीयान्वितिः - २** | |
| **प्रश्नः -५** | **द्वयोः ससन्दर्भं व्याख्या कार्या ।** | ०८ |
| | (१) पापोहमप्रतिकृतानुजनाशदर्शी तातस्य बाष्पपयसा तव चाम्ब हेतुः ।<br>दुर्जातमत्र विमलेभरतान्वये वः, किं मां-सुतक्षयकरं सुत इत्यवैषि ॥<br>(२) शोचामि शोच्यमपि शत्रुहतं न वत्सं,<br>दुःशासनं तमधुना न च बन्धुवर्गम् ।<br>येनातिदुःश्रवमसाधुकृतं तु कर्णे,<br>कर्तास्मितस्य निधनं समरे कुलस्य ॥<br>(३) भवति तनय लक्ष्मीः साहसेष्वीदृशेषु,<br>द्रवतिहृदयमेतद्भीतममुत्प्रेक्ष्यभीमम् ।<br>अनिकृतिनिपुणं ते चेष्टितं मानशौण्ड,<br>छलबहुलमरीणां सङ्गरं हा हतोऽस्मि ॥ | |
| **प्रश्नः -६** | पञ्चमाङ्कस्य सारांशः ग्रन्थोक्तदिशा वर्णयत । | ०८ |

| | | |
|---|---|---|
| | अथवा<br>अश्वत्थाम्नाः उक्त कर्णनिन्दां ग्रन्थोक्तदिशा वर्णयत। | |
| **प्रश्नः -७** | **टिप्पणीद्वयं लेख्यम्।** | ०४ |
| | (१) जनान्तिकम्, (२) विष्कम्भम्, (३) प्रस्तावना | |
| **प्रश्नः -८** | **पञ्चप्रश्नानाम् एकैकवाक्यद्वारा उत्तरं प्रयच्छत।** | ०५ |
| | (१) वेणीसंहारनाटकस्य का रीतिः ?<br>(२) कर्णं को जघान ?<br>(३) कृष्णः अस्मिन् नाटके को वर्तते ?<br>(४) अस्य नाटकस्य प्रतिनायक को विद्यते ?<br>(५) दुर्योधनः विसंज्ञः कदा जातः ?<br>(६) कौरवेश्वरः कः ?<br>(७) कर्णस्य अपरं नाम किम् ? | |
| | **तृतीयान्वितिः - ३** | |
| **प्रश्नः -९** | **द्वयोः ससन्दर्भं व्याख्या कार्या।** | ०८ |
| | (१) शक्ष्यामि किं परिधपीबरबाहुदण्डौ,<br>वित्तेशशक्रपुरदर्शितवीर्यसारौ।<br>भीमार्जुनौ क्षितितले प्रविचेष्टमानौ<br>द्रष्टुं तयोश्च निधनेन रिपुं कृतार्थम्॥<br>(२) एतज्जलं जलजनीलविलोचनाय<br>भीमाय भोस्तव मामाऽप्यविभक्तमस्तु।<br>एकं क्षणं विरमवत्स पिपासितोऽपि<br>पातुं त्वया सहजवादयमागतोऽस्मि।<br>(३) आशैशवादनुदिनं जनितापराधी<br>मत्तोबलेन भुजयोर्हतराजपुत्रः।<br>आसाद्य मेऽन्तरमिदं भुजपञ्जरस्य<br>जीवन्प्रयासि न पदात्पदमद्यपापः॥ | |
| **प्रश्नः -१०** | षष्ठाङ्कस्य कथासारः ग्रन्थोक्तदिशा वर्णयत।<br>अथवा<br>भयाकुलितं द्रौपदीं युधिष्ठिरः आश्वासयन् किं कथयति ? सप्रसङ्गं विवेचय। | ०८ |
| **प्रश्नः -११** | **टिप्पणीद्वयं लेख्यम्।** | ०४ |
| | (१) दुर्योधनः, (२) सुवदना (३) भानुमती। | |
| **प्रश्नः -१२** | **पञ्चप्रश्नानाम् उत्तराणि।** | ०५ |
| | (१) वृषसेनः कः ?<br>(२) नेपथ्यस्य किं लक्षणम् ?<br>(३) द्रौपदी कीदृशी नायिका ?<br>(४) वेणीसंहारनाटकस्य प्रमुखो रसः कः ?<br>(५) दुर्योधनस्य पुरोहितस्य किं नाम ?<br>(६) चार्वाकः कोऽस्ति ?<br>(७) षष्ठाङ्के कति श्लोकाः ? | |

***